|| শ্ৰী ||

অথ শ্ৰী ত্ৰিৱিক্ৰমপংডিতাচাৰ্য়সুত শ্ৰী নাৰায়ণপংডিতাচাৰ্য়ৱিৰচিতঃ

|| শ্ৰী মধ্ৱৱিজয়ঃ ||

৫. পংচমঃ সৰ্গঃ

ৱেদাংতৱিদ্যানিজৰাজ্যপালনে সংকল্প্যমানো গুৰুণা গৰীয়সি |
অদভ্ৰচেতা অভিষিচ্যতে পুৰা স ৱাৰিভিৰ্ৱাৰিজপূৰিতৈৰথ || ৫.১ ||

আনংদৰূপস্য পৰস্য পাত্ৰ ধীঃ আনংদসংদায়িসুশাস্ত্ৰকৃত স য়ত |
আনংদতীৰ্থেতি পদং গুৰূদিতং বভূৱ তস্যাত্যনুৰূপ ৰূপকম || ৫.২ ||

কদাচিদত্ৰোপয়য়ৌ য়তিঃ সখা গোৱিংদবুদ্ধেৰ্বহুশিষ্যসংৱৃতঃ
অমুষ্য শিষ্যা অনুমানশিক্ষিতাঃ তদাঽজিগীষন গুৰুবুদ্ধিমুদ্ধতাঃ || ৫.৩ ||

ভিদা সুসাধ্যেত্যনুমানমত্ৰ তৈঃ প্ৰায়ুজ্যতাঽশু প্ৰতিপক্ষভীষণম
অখংডয়দ ৱ্যক্তমখংড ধীৰিদং স পক্ষদক্ষঃ ফণিনং ৱিৰাডিৱ || ৫.৪ ||

অথাপি মিথ্যা ৱিমতং মতৎৱতো ৱিৱাদ নিৰ্মুক্ত ৱদিত্যৱাদি তৈঃ |
অনেন সত্যং ৱিমতং মতৎৱতো য়থা ঘটাদীত্যনুমা ন্যগদ্যত || ৫.৫ ||

হেতোৰতিৱ্যাপ্তিৰৱাদি তৈৰ্য়দা সকৌতুকৈস্তূৰ্ণমসাৱৱিস্ময়ঃ |
ন শুক্তিৰূপ্যাদি মতং য়দন্যথা মতং তদিত্যাদি ৱদন জিগায় তান || ৫.৬ ||

তত্ত্ৱেঽপ্যতত্ত্ৱে ৱিমতেঽনুমাং ৱদন তদপ্ৰতিষ্ঠাং প্ৰতিপাদুকঃ স্ৱয়ম |
ৱিজিত্য ৱিশ্ৱান ৱিদূষং সভাস্ৱসৌ জগাম নাম্নাঽপ্যনু মান তীৰ্থতাম || ৫.৭ ||

সমস্তৱাদীংদ্রগজপ্রভংগদঃ চৰন্নৱন্যাং প্রতিপক্ষকাংক্ষয়া |
ৱেদদ্ৱিষাং য়ঃ প্রথমঃ সমায়য়ৌ স ৱাদিসিংহোঽত্র সবুদ্ধিসাগৰঃ || ৫.৮ ||

তস্যোৰুদুর্গৰ্ৱৰতো জিগীষয়া নিশাতমাদত্ত মুকুংদধীর্দ্রুতম |
স্ৱশিষ্যহস্তেন মঠাংতৰেষুধেঃ সুপক্ষদক্ষং সুখতীর্থমার্গণম || ৫.৯ ||

জৈত্রং প্রজিজ্ঞাসু কুতূহলাকুলং নৃণাং কুলং প্রৎৱৰিতং নিশাময়ন |
অৰংদতোপেত্য গুৰুং গৰিষ্ঠধীঃ স ৰূপ্যপীঠায়তনোত্তমস্থিতম || ৫.১০ ||

স ৱাদিসিংহস্য গিৰং গৰীয়সীং অখংডয়ত পংডিতমংডলাংতৰে |
তীক্ষ্নেন ৱাক্যেন মিতেন ৱেগিনা গদাং শৰেণেৱ ৱিশাৰদো মুহুঃ || ৫.১১ ||

অসাৰসূয়ন দ্ৱিনৱপ্রকাৰতো ৱ্যচীক্ল পত কংচিদথার্থমুচ্চকৈঃ |
জগদ্ৱিজেতুশ্চ জয়ে সসংশয়ঃ তাৱজ্জনোঽজায়ত পূর্ণচেতসঃ || ৫.১২ ||

ৱিকল্পকোটীৰথ খংডয়ন দ্রুতং ৱেজেঽধিকং স্মেৰমুখো বৃহন্মতিঃ |
তমস্ততীৰ্ৱা দ্যুমণির্ৱিশুদ্ধয়া গৱা শ্রিতো ৱিষ্ণুপদং সদাস্পদম || ৫.১৩ ||

অগাধমাত্মন্যতিৱেলমুদ্ধতং তিৰস্কৃতাশেষসৰস্ৱতীততিম |
কামং মহামানসকুংভসংভৱো লঘূচকাৰেত্যপি বুদ্ধিসাগৰম || ৫.১৪ ||

শ্ৱ এৱ ৱাদোঽস্িৎৱতি ৱাদিনৌ খলৌ অদ্যোত্তৰং ভাতি য়দীর্য়তামিতি |
মধ্বেৱ ব্রুৱাণেঽমত তৌ জিতৌ জনঃ স নিশ্চিকায়াপি নিশাপলায়নাত || ৫.১৫

||

বুদ্ধ্যাঙ্কিনা ৰাদিৰৰেণ চাৰ্হর্জিতাং জয়শ্রিয়ং ভূপৰিৰৰ্তিনা চিৰাত |
অহো মুহূৰ্তাদয়মপ্রয়ত্নৰান অৰাপ্তৰানিত্যতিৰিস্মিতং জনৈঃ || ৫.১৬ ||

ৰ্যাখ্যান কদাচিন্মণিমদ্ৰিনির্মিতং ভাষ্যং জনৈস্তর্কৰিশাৰদৈর্ৰৃতঃ |
উৰাচ ৰাচং পৰিহাসহাসৰান সম্মোদতীৰ্থঃ সুৰমোদদায়িনীম || ৫.১৭ ||

সৎসূত্রভাৱে প্রৰিচাৰিতে পৃথগ ভাষ্যাভিসংধৌ চ ৰিশুদ্ধবুদ্ধিভিঃ |
নিগৃহ্য গূঢাগ্রহমুগ্রমেতয়োঃ মান্যোঽন্ৰয়োঽন্যোন্যমহো ন দৃশ্যতে || ৫.১৮ ||

ইতি ব্রুৰাণে প্রতিপাদয়ত্যলং ভাষ্যেঽত্র দোষান প্রবলান মুহুর্মুহুঃ |
তস্মিংস্তু ৰিস্মেৰধিয়োঽপি যত্নতো ন স্থেয়সঃ পৰ্যহৰন্নিমানমী || ৫.১৯ ||

নন্ৰস্য সূত্রস্য পৰোঽর্থ উচ্যতাং য়দ ভাষ্যমাত্রং ভৰতা নিৰস্যতে |
ভৰাদৃশৈর্য়ঃ করিৰিভির্ন দূষ্যতে কথংচনেত্যূচুৰিমে ৰচস্ৰিনঃ || ৫.২০ ||

অক্লিষ্টশব্দান্ৰয়মেষ সংভৰত সূত্রার্থমুচ্চৈর্ৰচনং তদাঽঽদদে |
মানীকৃতাম্নায়য়ুতস্মৃতি ক্ষণাদ এষ্যৎকথা তাংডৰসূত্রধাৰকম || ৫.২১ ||

বুভুৎসয়া মৎসৰৰৰ্জিতান জনান সমৎসৰান ৰা ৰিজিগীষয়াঽঽগতান |
শ্রুতপ্রৰীণানতিতার্কিকান মুহুঃ ভংগ্যাঽনয়া ভংগমুপানিনায় সঃ || ৫.২২ ||
কদাচিদেনং প্রতিগম্য সৌম্যধীঃ স মধ্যগেহাৰ্য়ৰৰঃ প্রসেদিৰান |
হেতোঃ কুতশ্চিদ ৰিমনীকৃতোঽপ্যহো গুণাঙ্কিলুব্ধঃ সুজনঃ প্রসীদতি || ৫.২৩ ||

তেজোঽমৃতং নংদনগাত্রপাত্রগং নেত্রাংজলিভ্যামপিবত সদাঽৰ্ব্যয়ম |
ৰিদ্যাসুধাং চাস্য ৰচোমহাঘটে পূর্ণামসৌ কর্ণপুটেন পংডিতঃ || ৫.২৪ ||

লীলাৰিৰাদে গুৰুণা জগদ্গুৰোঃ প্রসংগতস্তত্র চ তাদৃশে সতি |
সূত্রার্থৰিচ্চেত কুৰু ভাষ্যমংজসে ত্যাক্ষেপপূৰ্ৰং গুৰুৰভ্যধাদিমম || ৫.২৫ ||

ৰিধানমাত্রং তদুপাদদে তদা পয়ো য়থাঽচ্ছং পৰমঃ স হংসৰাট |
তল্লীনমাক্ষেপমুপৈক্ষতাফলং ৰাৰীৰ সংতো হি গুণাংশতোষিণঃ || ৫.২৬ ||

ৰৈৰাগ্যৰৈয়াত্যসুৰাক্ৎৰপূৰ্ৰকৈঃ য়ুতো গুণৈঃ পাৰমহংস্যভূষণৈঃ |
জ্যেষ্ঠো য়তির্য়ো লিকুচান্ৰয়োদ্ভৰঃ তং ভূৰিভক্তিঃ স কদাচিদব্রৰীত || ৫.২৭ ||

ৰিৰোধি ৰেদাংতকৃতাংতসংপদাং ভাষ্যাদিকং চেদিদমস্তু কা ক্ষতিঃ |
অস্মভ্যমাচক্ষ্ৰ ৰিচক্ষণোচিতং ভাৰং তু সূত্রোপনিষদ্ৰিৰক্ষিতম || ৫.২৮ ||

ইত্যস্য ৰাচা শৰদেৰ ভাসিতা য়দাঽখিলাশাঃ শুভপূর্ণয়া বভৌ |
প্রমোদতীর্থাননচংদ্রচংদ্রিকা ৰ্যাখ্যাভিধা ৰিষ্ণুপদপ্রকাশিনী || ৫.২৯ ||

জেষ্যন কদাচিত কিল কালপালিতাং দিশং প্রয়াতোঽচ্যুতবুদ্ধিনা সহ |
সমগ্রধীর্মংডিতৰিষ্ণুমংগলং ৰিষ্ণুং জগন্মংগলমাননাম সঃ || ৫.৩০ ||

ভিক্ষাপ্রদাত্রাঽত্র পৰীক্ষিতুং মুহুঃ দত্তে প্রভুক্তে কদলীফলোচ্চয়ে |
অনেন নির্য়ত্নমৰার্য়ৰিস্ময়ঃ তমার্য়ৰর্য়ং ৰিজনেঽৰদদ গুৰুঃ || ৫.৩১ ||

ভিক্ষাৱসানে দ্ৱিশতাধিকৈঃ ফলৈঃ ৱ্যঢৈঃ প্রভুক্তৈঃ পৰিপূৰিতেঽপি তে |
তনূদৰে নাস্তি গৰিষ্ঠতা কথং সুচিত্ত সত্যং ৱদতাদ ভৱানিতি || ৫.৩২ ||

অংগুষ্ঠমাত্রং জঠৰপ্রতিষ্ঠিতং জাজ্ৱল্যমানং মম জাতৱেদসম |
নিত্যং হিতং ৱিশ্ৱদহং চ ৱিত্ত তং ৱিশ্ৱেশচেতা ইতি সোঽব্ৰৱীত তদা || ৫.৩৩ ||

পৰ্য্যাকুলানেকসৰস্ৱতীততীন ন্যায়োপপন্নান ৱিৱিধাৰ্থসংয়ুতান |
অতীত্য দেশান সময়াংশ্চ চাৰুধীঃ অসৌ জগামাভিমতেন ৱৰ্ত্মনা || ৫.৩৪ ||

স্ৱহেলয়া পাতিতপাৰ্থিৱব্ৰজাং ধীশুদ্ধিদাং কেৱলভূষণায়িতাম |
পয়স্ৱিনীং প্রেক্ষ্য পথি দ্ৱিজাৰ্চিতাং স ভাৱিনীমস্মৰদত্ৰ চংডিকাম || ৫.৩৫ ||

ততঃ ক্রমেণ প্রচলন্নুপেয়িৱান অৰংদতেংদীৱৰসুংদৰচ্ছৱিম |
অংভোজনাভং স ভুজংগশায়িনং শ্রীৱল্লভং শ্রীমদনংতসৎপুৰে || ৫.৩৬ ||

ৱেদাংতসূত্রাণি কৃতাংতৱিত্তমো ৱ্যাখ্যাদসৌ শিষ্যগণায় সংসদি |
ৱিলক্ষণং জীৱগণাদ গুণাৰ্ণৱং ব্ৰহ্মাচ্যুতাখ্যং প্রতিপাদয়ন মুহুঃ || ৫.৩৭ ||

অপ্রাংশুনূত্নোপপদাধিৱাসজঃ স সংকৰো ৱৈৰপৰায়ণঃ পুনঃ |
অসূয়য়োচেঽত্ৰ মহানতিক্রমঃ সূত্রাৰ্থ ৱাদোঽকৃতভাষ্যকেশ্ৱিতি || ৫.৩৮ ||

ৱদোত্তৰং ভাতি য়দীহ কুৰ্মহে ভাষ্যং কৃতিৰ্নাস্য হি দংডৱাৰিতা |

জগদ্গুৰুণামিতি তাং গুৰোৰ্গিৰং জনঃ সমস্তোঽভিননংদ সস্মিতাম || ৫.৩৯ ||

প্ৰাজ্ঞৈৰ্মহাপূৰুষসৰ্ৱলক্ষণৈঃ সংপন্নদেহোঽয়মিতীৰিতে প্ৰভৌ |
পৰে পৰস্যাপ্যতিপীনতাদৃশঃ স্ফিঙ্মাত্ৰসংশংসনমেৱ চক্ৰিৰে || ৫.৪০ ||

স্ফিগ্দূষণানি প্ৰতিপাদয়ত্যলং সংপূৰ্ণসংখ্যেঽস্য তু লক্ষশাস্ত্ৰতঃ |
তদ্দংডসংখংডনসংশ্ৰৱং ব্যধাত তদক্ষমোঽসৌ প্ৰকৃতিৰ্হি সাঽসতাম || ৫.৪১ ||
স
নাৎৱাঽত্ৰ তীৰ্থেষ্ৱচিৰেণ কন্যকাতীৰ্থে সুতীৰ্থে সুখতীৰ্থ আপ্লুতঃ |
সমুদ্ৰসেতৌ চ নিমজ্য ৱিষ্ণৱে শ্ৰীৰামনাথায় নমাশ্চকাৰ সঃ || ৫.৪২ ||

তমাৱ্ৰজংতং য়তিৱেষধাৰিণং দংডং প্ৰকাশ্যৈষ হসন্নভাষত |
খংড্যেত দংডো য়দি চংড ন ৎৱয়া ৎৱং পংডকোঽপংডিত ৱংধ্যৱাগিতি || ৫.৪৩ ||

লজ্জানতঃ স্ৱাৰ্থমথাৰ্থয়ন্নসন উপেক্ষ্যতাসৌ দ্ৱিজনায়কৈস্তদা |
আনংদয়ংতং ৱদনেংদুনা জগত তং দ্ৱেষ্টি কঃ প্ৰাজ্ঞমিহেতি ৱাদিভিঃ || ৫.৪৪ ||

য়ায়াঃ প্ৰসক্তাঃ পৰিষৎসু পূৰুষৈঃ ৱিদ্যা ৱিদগ্ধৈৰ্ৱিৱিধৈঃ সমাগমে |
স তাসুতাসু প্ৰতিভাতিভাসুৰো ৱিদ্যাসু ৱিদ্যাধিপতিৰ্জিগায় তান || ৫.৪৫ ||

অচাল্যমানঃ সগুৰুঃ স চাপলৈঃ অসজ্জনানামবলীয়সামিহ |
উৱাস মাসাংশ্চতুৰো মহামনাঃ সিংহো গুহাংতোপগতঃ শুনামিৱ || ৫.৪৬ ||

শৃংগাৰসিংধুং স ভুজংগশায়িনং শ্রীৰংগৰাসং কৃতমংগলং সতাম |
অমংদধীর্দেৰমৰংদতাঽগতঃ কৱেৰকন্যাহিমৰায়ুসেৱিতম || ৫.৪৭ ||

ততো নিৱৃত্তঃ পৰমেৱ পূৰুষং প্রণম্য নানায়তনেষু সংচৰন |
প্রকাশয়ন স্ৱাতিশয়ানমানুষান আশামুদীচীং প্রয়য়াৱসৌ ক্রমাত || ৫.৪৮ ||

ততস্ততো ৱিস্মিতলোচনৈর্নৰৈঃ নিৰীক্ষ্যমাণোঽতিসুলক্ষণাকৃতিঃ |
গ্রামোত্তমান প্রাপ্য পয়স্ৱিনীতটে ৱিৱেশ দেৱায়তনং স কিংচন || ৫.৪৯ ||

অধীত্য ধর্মেণ ষডংগমাগমং তদর্থসংৱর্ণননির্ণয়ান্ৱিতাঃ |
প্রাপুর্দ্ৱিজেংদ্রাস্তমপূৰ্ৱপূৰুষং জিজ্ঞাসৱঃ সুপ্রথিতং জগত্ত্রয়ে || ৫.৫০ ||

সুস্মিতেন্দুমৰৱিন্দলোচনং স্ৱর্ণৱর্ণমতিভদ্রভাশণম |
ৱীতভূশমপি ৱিশ্ৱভূশণংতং দিদ্ৃক্শুৰলমাপতজ্জনঃ || ৫.৫১ ||

ৱিদ্যোৰুদ্যুতিধীৰতাৰকতিৰস্কাৰে পতংগায়িতো
দুর্ৱাদীভকুতর্ককুংভদলনে সিংহপ্রবর্হায়িতঃ |
লোলালোককলোকদৃক্কুমুদিনী সংহ্লাদনেঽব্জায়িতঃ
সংসন্মংডলমংডনায়িত উত স্ৱানংদতীর্থো বভৌ || ৫.৫২ ||

|| ইতি শ্রীমৎকৱিকুলতিলক ত্রিৱিক্রমপংডিতাচার্যসুত
নাৰায়ণপংডিতাচার্যৱিৰচিতে শ্রীমধ্ৱৱিজয়ে
আনংদাংকিতে পংচমঃ সর্গঃ ||

www.yogigita.com